lustre, energy; विपन्नदीधितिरपि Bh. 2. 29. -4 A finger. -5 Ved. A religious prayer or devotion; इयं सा वो अस्मे दीधितिर्यजत्रा Rv. 1. 186. 11. -6 A son-in-law. -7 Divine inspiration.

**दीधितिमत्** *a.* Brilliant. -*m.* The sun; प्रातर्दीधितिमानिव (आविरभूत्) Ku. 2. 2; 7. 70.

**दीधी** 2 Ā. (दीधीते) 1 To shine, -2 To seem, appear; अक्षेत्रविद् यथा मुग्धो भुवनान्यदीधयुः Rv. 5. 40. 5.

**दीनारः** 1 A particular gold; जितश्चासौ मया षोडशसहस्राणि दीनाराणाम् Dk. -2 A coin in general. -3 A gold ornament. -4 A seal. -5 A weight of gold (cf. Gr. *denarius*).

**दीप्** 4 Ā. (दीप्यते, दीप्त; *freq.* देदीप्यते) 1 To shine, blaze, (fig. also); सर्वैरुस्त्रैः समग्रैस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः M. 2. 12; तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् N. 2. 44; Bk. 2. 2; R. 14. 64; H. Pr. 46. -2 To burn, be lighted; सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते Bṛi. Up. 1. 3. 12. यथा यथा चेयं चपला दीप्यते K. 105. -3 To glow, be inflamed or excited, increase (fig. also); वन्येतरानेकपदर्शनेन पुनर्दिदीपे मदद्दुर्दिनश्रीः R. 5. 47; Bk. 15. 88; Śi. 20. 71. -4 To be fired with anger; आसाद्य वाचं स भृशं दिदीपे Ki. 3. 55. -5 To be illustrious. -*Caus.* (दीपयति-ते) 1 To kindle, set on fire, inflame; अयं हि मां दीपयतेऽद्य वह्निः Rām. 2. 43. 21. -2 To illuminate, light, irradiate; वृन्दावनान्तरमदीपयदंशुजालैः (इन्दुः) Gīt 7; U. 1. 42. -3 To excite, raise. -4 To adorn, grace; अवयवदीपितमण्डनश्रियस्ताः Ki. 10. 1.

**दीपः** [दीप्-णिच् अच्] 1 A lamp, light; नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि। अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित्॥ Pt. 1. 221; न हि दीपौ परस्परस्योपकुरुतः Ś. B.; so ज्ञानदीपः &c. -**Comp.** -**अङ्कुरः** the flame or light of a lamp; दीपाङ्कुरच्छायाचञ्चलमाकलय्य Bh. 3. 68. कुरण्टकविपाण्डुरं दधति धाम दीपाङ्कुराः Vb. -**अन्विता** 1 the day of new moon (अमा). -2 = दीपाली q.v. -**आराधनम्** worshipping an idol by waving a light before it. -**आलिः, -ली, -आवली, -उत्सवः** 1 a row of lights, nocturnal illumination. -2 particularly, the festival called *Diwali* held on the night of new moon in आश्विन. -**उच्छिष्टम्** soot, lamp-black. -**कलिका** 1 the flame of a lamp. -2 N. of a com. on Yajñavalkya. -**किट्टम्** lamp-black, soot. -**कूपी, -खोरी** the wick of a lamp. -**द** *a.* one who gives a lamp; दीपदश्चक्षुरुत्तमम् Ms. 4. 229. -**दण्डः** A lamp-post. -**ध्वजः** 1 lamp-black. -2 lamp-stand. -**पुष्पः** the Champaka tree. -**भाजनम्** a lamp; वामनार्चिरिव दीपभाजनम् (अभूत्) R. 19. 51. -**माला** lighting, illumination; अद्यापि तां धवलवेश्मनि रत्नदीपमालामयूखपटलैर्दलितान्धकारे Ch. P. 18. -**वर्तिः** the wick of a lamp. -**वृक्षः** 1 a lampstand. कनकोज्ज्वलदीप्तदीपवृक्षम् (आसनम्) Bu. Ch. 5. 44. तथेह पञ्चेन्द्रियदीपवृक्षा ज्ञानप्रदीप्ताः परवन्त एव Mb. 12. 202. 9. A treelike column of building (Mar. दीपमाळ); Rām. 2. 6. 18; also दीपपादप (a candle-stick). -2 a light. -3 a lantern. -4 the tree called *devadāru* q. v. -**शत्रुः** a moth. -**शिखा** 1 the flame of a lamp. अनङ्गमङ्गलावासरत्नदीपशिखामिव Ks. 18. 77. -2 lamp-black. -**शृङ्खला** a row of lights, illumination.

**दीपक** *a.* (-**पिका** *f.*) [दीप्-ण्वुल्] 1 Kindling, inflaming. -2 Illuminating, making bright. -3 Illustrating, beautifying, making illustrious. -4 Exciting, making intense; सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः Śi. 2. 55; Pt. 3. 28. -5 Tonic, stimulating digestion, digestive. -6 Skilful in managing a lamp. -**कः** 1 A light, lamp; तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः Bh. 1. 70. -2 A falcon. -3 An epithet of Kāmadeva (also दीप्यक). -4 N. of several plants (Mar. ओंवा, जिरें, चित्रक, कांदा, मोरशेंडा) -5 N. of a Rāga. -6 A kind of measure. -**कम्** 1 Saffron. -2 (In Rhet.) A figure of speech in which two or more objects (some प्रकृत 'relevant' and some अप्रकृत 'irrelevant') having the same attribute are associated together, or in which several attributes (some relevant and some irrelevant) are predicated of the same object; सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्। सैव क्रियासु बह्वीषु कारकस्येति दीपकम्॥ K. P. 10; cf. वदन्ति वर्ण्यावर्ण्यानाम् धर्मैक्यं दीपकं बुधाः। मदेन भाति कलभः प्रतापेन महीपतिः॥ Chandr. 5. 45.

**दीपन** *a.* [दीप् णिच् ल्यु ल्युट् वा] 1 Kindling, inflaming, &c. -2 Digestive, tonic. -3 Exciting, animating, stimulating; आनन्दमिश्रमदनज्वरदीपनानि Māl. 9. 47. -**नम्** 1 Kindling, inflaming. -2 A tonic stimulating digestion. -3 Exciting, stimulating, -4 Lighting, illuminating. -5 Promoting digestion. -6 Saffron. -**नः** see दीपकः (4). -**नी** 1 N. of several plants (Mar. काकडी, मेथी, पहाडमूळ, ओंवा). -2 A mystical Tāntrika formula. -3 (In Music) A kind of composition.

**दीपनीय** *a.* 1 To be lighted or set on fire. -2 Combustible, inflammable. -3 To be excited or stimulated. -4 Relating to tonic medicines. -**यः** 1 An aromatic seed (यवानी). -2 N. of some medicinal or aromatic substances (Mar. सुंठ, मिरी, पिंपळी). -**यम्** A tonic medicine.

**दीपिका** 1 A light, torch; आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिका, R. 4. 75; 9. 70. -2 (At the end of comp.) Illustrator. elucidator as in तर्कदीपिका. -3 Moonlight. -4 N. of a Rāgiṇī: -5 N. of some plants (Mar. वेखंड, मेथी, ओंवा). -**Comp.** -**तैलम्** the oil of ptychotis Ajowan (Mar. ओंव्याचें तेल). -**धारिणी** a female lamp-carrier; K.

**दीपित** *p. p.* 1 Set on fire. -2 Inflamed. -3 Illuminated. -4 Manifested. -5 Excited, stimulated.

**दीपितृ** *m.* An illuminator, enlightener, P. III. 2. 153.

**दीपिन्** *a.* 1 Inflaming, kindling; राकानिशेव पूर्णेन्दुमुखी कन्दर्पदीपिनी Ks. 82. 29. -2 Illuminating. -3 Shining, bright.

**दीप्त** *p. p.* [दीप् क्त] 1 Lighted, inflamed, kindled; यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः Muṇḍ. 2. 1. 1.